जोषकः-षिका, जुजोषयिषकः-षिका, [1]जोषकः-षिका, [2]जुजोषिषकः-
जुजुषिषकः-षिका, जोजुषकः-षिका ;——

जोषयिता-त्री, जुजोषयिषिता-त्री, जोषिता-त्री, जुजोषिषिता-जुजुषि-
षिता-त्री, जोजुषिता-त्री ;

जोषयन्-न्ती, जुजोषयिषन्-न्ती, [3]जोषन्-न्ती, जुजोषिषन्-जुजुषिषन्-न्ती ;

जोषयिष्यन्-न्ती-ती, जुजोषयिषिष्यन्-न्ती-ती, जोषिष्यन्-न्ती-ती, जुजोषि-
षिष्यन्-जुजुषिषिष्यन्-न्ती-ती ; ——

जोषयमाणः, जुजोषयिषमाणः,—जोजुष्यमाणः ;

जोषयिष्यमाणः, जुजोषयिषिष्यमाणः-जोजुषिष्यमाणः ;

[4]जोट्-जोड्-जोषौ-जोषः ; — —

जोषितः, जुजोषयिषितः, जुषितः-[A]जुषितवान्, जुजोषिषितः-जुजुषिषितः,
जोजुषितः-तवान् ;

जोषः, जुजोषयिषुः, जोषः, जुजोषिषुः-जुजुषिषुः, जोजुषः ;

जोषयितव्यम्, जुजोषयिषितव्यम्, जोषितव्यम्, जुजोषिषितव्यम्-जुजुषि-
षितव्यम्, जोजुषितव्यम् ;

जोषणीयम्, जुजोषयिषणीयम्, जोषणीयम्, जुजोषिषणीयम्-
जुजुषिषणीयम्, जोजुषणीयम् ;

जोष्यम्, जुजोषयिष्यम्, जोष्यम्, जुजोषिष्यम्-जुजुषिष्यम्,
जोजुष्यम् ;

ईषज्जोषः-दुर्जोषः-सुजोषः ; — —

---

1. 'आधृषाद्वा' (ग. सू. चुरादौ) इति णिज्विकल्पः। तेन णिजभावपक्षे क्रमेण शुद्धात्, शुद्धप्रकृतिकसन्नन्तात् यङन्ताच्च रूपाणि प्रदर्शितानि।

2. 'रलो व्युपधाद्धलादेः संश्च' (1-2-26) इति कित्वविकल्पः। तेन रूपद्वयम्। एवं क्त्वाप्रत्ययेऽपि बोध्यम्।

3. णिजभावपक्षे 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदमेव। तेन शुद्धाद्धातोः शानज् न।

4. क्विपि णिज्निमित्तक उपधागुणे कृते, 'झलां जशोऽन्ते' (8-2-39) इति जश्त्वे चर्त्वविकल्पः।

A. 'मल्लोऽर्थः स च हिंसितः पदमुपासात्सीद्धरेः शुन्धितः
तावत् स्वं बलमच्छदन् जुषितवान् मुष्ट्या हली मुष्टिकम्॥' धा. का. 3. 50.